आग्नेयं८ सौम्यं१०इति, चत्वारि४ वेदव्रतानि गोदानं१५ केशान्तः१६ चेति द्वादश, पूर्वोक्तञ्च इत्यष्टयेषु षोड़शत्वम्। "कृत्यादिकञ्च गुरवे दत्त्वा मन्त्रमेनं जपेत्। नमो हिरण्यगर्भाय विश्वगर्भाय ते नमः। चराचरस्य जगतो गृहभूताय वै नमः। मत्तोऽयं जनितः पूर्वं मर्त्यधर्मा- द्विजोत्तमः। त्वद्गर्भसम्भवादेष दिव्यदेहो भवाम्यहम्। चतुर्भिः कलशैर्भूयस्ततस्ते द्विजपुङ्गवाः। स्नानं कुर्य्युः प्रसन्नाश्च सर्वाभरणभूषिताः"। कलशैः कुण्डसमीपस्थितैरेव, स्नानं कुर्य्युर्यजमानस्येति शेषः "देवस्य त्वेति मन्त्रेण स्थितस्य कनकासने। अद्य जातस्य तेऽङ्गानि अभिषेक्ष्यामहे वयम्। दिव्येनानेन वपुषा चिरञ्जीव सुखीभव। ततो हिरण्मयगर्भं तं तेभ्यो दद्याद्विचक्षणः"।

**हिरण्यनाभ** पु० हिरण्यं नाभौ यस्य अच्समा०। मैनाकपर्वते हेमच०।

**हिरण्यय** हिरण्यस्य विकारः तदात्मकं वा मयट् वेदे निपातात् मलोपः। १हिरण्यात्मके २स्वर्णविकारे च "हिरण्ययेन सविता रथेना" यजु०। ४३अ० सूर्य्यमन्त्रः "अथ य एष हिरण्मयः पुरुषो दृश्यते" छान्दो० उ०।

**हिरण्यरेतस्** पु० हिरण्यं रेतो यस्य। १वह्नौ २चित्रकवृक्षे च अमरः। अग्निरेतस्शब्दे दृश्यम्। ३सूर्य्ये मेदि० ४अर्कवृक्षे ५शिवे जटा०।

वह्नेस्तन्नामकारणं यथा "यत्पीतं वीतिहोत्रेण वीर्य्यं त्यक्तं पिनाकिना। तेनाक्रान्तोऽभवत् ब्रह्मन्! मन्दतेजा हुताशनः"। 'हुताशनोऽपि च भयाद् यत्र तत्र परिभ्रमन्। पञ्च वर्षसहस्राणि ख्याप्यास्ते हव्यभुक् ततः। मांसमस्थीनि रक्तानि मेदोमज्जत्वचस्तथा। रोमाणि चाक्षिकेशाद्याः सर्वे जाता हिरण्मयाः। हिरण्यरेता लोकेऽस्मिन् विख्यातः पावकस्ततः" वामनपु० ५४अ०।

**हिरण्यवर्णा** स्त्री हिरण्यस्येव वर्णो यस्याः। १नदीभेदे हेमच० २हेमतुल्यवर्णयुते त्रि० "हिरण्यवर्णां हरिणीम्" श्रीसू०

**हिरण्यबाहु(हु)** हिरण्यं वाहयति प्रापयति भक्तान् हिरण्यवर्णौ बाहू इव वा यस्य। १महादेवे २शोणनदभेदे च अमरः।

**हिरण्याक्ष** पु० कश्यपस्य पुत्रे दैत्यभेदे। हिरण्यकशिपुशब्दे दृश्यम्। स च वराहरूपेण विष्णुना हतः। "हतो हिरण्यकशिपुः हरिणा सिंहरूपिणा। हिरण्याक्षो धराद्धारे बिभ्रता शौकरं वपुः" भाग० ७।१अ०।

**हिरण्याश्व** पु० हिरण्यनिर्मितोऽश्वः। तुलादिषोड़शमहादानमध्ये दानार्थं स्वर्णादिना १कल्पितेऽश्वे २तद्दाने च। "अथातः संप्रवक्ष्यामि हिरण्याश्वविधिं परम्। यस्य प्रसादाद्भुवनमनन्तफलमश्नुते। पुण्यां तिथिमथासाद्य कृत्वा ब्राह्मणवाचनम्। लोकेशावाहनं कुर्य्यात् तुलापुरुषदानवत्। ऋत्विग्मण्डपसम्भारभूषणाच्छादनादिकम्। स्वल्पेष्वेकाग्निवत् कुर्य्याद्धेमवाजिमखे बुधः"। आदिशब्देन देशकालवृद्धिश्राद्धशिवादिपूजागुरुऋत्विग्वरणमधुपर्कदानवेदिकोपरिचक्रलेखनवितानतोरणपताकाधिवासनादि मत्स्यपुराणोक्ततुलापुरुषदानविहितं संगृह्यते, स्वल्पेष्वेकाग्निवदिति, व्याख्यातं, "स्थापयेद्वेदिमध्ये तु कृष्णाजिनतिलोपरि" कृष्णाजिननिहितद्रोणपरिमिततिलोपरीति विज्ञेयम्। 'कौशेयवस्त्रसंवीतं कारयेद्धेमवाजिनम्। शक्तितस्त्रिपलादूर्द्ध्वमासहस्रपलाद् बुधः। पादुकोपानहच्छत्रचामरासनभाजनैः। पूर्णकुम्भाष्टकोपेतं माल्येक्षुफलसंयुतम्। शय्यां सोपस्करां तद्वत् समार्त्तवस्त्रसंयुतम्"। शय्योपस्करा विविधास्तरणोपधानवस्त्रफलपुष्पकुङ्कुमकर्पूरागुरुचन्दनताम्बूलदर्पणकङ्कतिकाचामरव्यजनासनपतद्ग्रहस्थितपात्रासिपादुकोपानद्युगलताम्रघटिकादिजलपात्रदीपिकावितानादयः। मार्त्तवस्त्रसंयुतामिति, उपर्य्याच्छदस्य सौवर्णमश्वं कुर्य्यादित्यर्थः। सूर्य्यलक्षणमुक्तं ब्रह्माण्डदाने "ततः सर्वौषधिस्नानस्नापितो वेदपुङ्गवैः। इममुच्चारयेन्मन्त्रं गृहीतकुसुमाञ्जलिः"। इहापि पूर्वेद्युरधिवासनं विधाय द्वितीयदिवसे पूर्ववत् पुण्याहवाचनादिपूर्णाहुतिपर्य्यन्तं कर्म, गुरुः समापयेत्। अथ सर्वौषधिजलस्नातः शुक्लाम्बरो यजमानस्त्रिःप्रदक्षिणीकृत्य वक्ष्यमाणमन्त्रमुदीरयेत्। "नमस्ते सर्वदेवेश! वेदाहरणलम्पट!। वाजिरूपेण मामस्मात् पाहि संसारसागरात्। त्वमेव सप्तधा भूत्वा छन्दोरूपेण भास्करम्। यस्मात् त्वामवसे लोकानतः पाहि सनातन!। एवमुक्त्वा गुरवे तमश्वं विनिवेदयेत्। दत्त्वा पापक्षयाद्धामो लोकमभ्येति शाश्वतम्। गोभिर्विभवतः सर्वान् ऋत्विजश्चाभिपूजयेत्। सर्वधान्योपकरणं गुरवे विनिवेदयेत्। सर्वं शय्यादिकं दत्त्वा भुञ्जीतातैलमेव हि। पुराणश्रवणं तद्वत् कारयेद्भोजनादनु"। दानवाक्यञ्च पूर्ववदनुसन्धेयम्, अनुक्तदक्षिणेषु सुवर्णं दक्षिणेति, यथाशक्ति सुवर्णदक्षिणा, विभवतः स्वविभवानुसारेण सर्वान् सदस्यादीन् ऋत्विजश्च गोभिः पूजयेत्, सर्वधान्योपकरणानीति विनियोगात्